# Kaveri Stotram

# कावेरीस्तोत्रम्

## Document Information

Text title : kAverIstotram 2

File name : kAverIstotram2.itx

Category : devii, nadI, devI

Location : doc_devii

Proofread by : Prabha Maruvada

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2024

*sanskritdocuments.org*

# कावेरीस्तोत्रम्

श्रीः ।
श्रीवेङ्कटेशाय नमः ।
सह्याचलसमुद्भूते! सज्जनसमूहसंसेव्यमाने!
सुशिष्यसमाज समावृतकुम्भसम्भवसकलसरित्सलिल
सम्पूरितकलशमुखात्समीर- सहायेन रसायां संसरमाणे!
सन्ततवीचीसमूहसञ्चालित परिसरे ! रथगतिरिव प्रवाह
वेगगम्यमाने घृतघनीभूतफेनपङ्क्तिपरिवृते! अम्भोधि
निलयमकरमत्स्यकच्छपादि जलजन्तुसमूहावृते!
युवतिमनः समानागाधे! महापुरुषनिभगाम्भीर्य
धुरन्धरहृदछटाश्रीयमाणेङ्गुलापुञ्जकुसुमसिन्धूर-
कषाय-कुङ्कुम-किंशुकसम्भ्राजमानपुण्यसलिलसमूहे!
सन्ध्याराग-समानपूरसम्पूर्णे!
प्रवाहवेगगमनागमनप्रदक्षिणेन चक्र भ्रमसम
भजनशीलभङ्ग्याकथननरूपकलकलालाप
व्रजसमाजे सदा सर्वेश्वरध्यानपरायण
मुनिबृन्दनिषेण्यमाणपुलिनवीथिकामहोन्नते,
हेमावती-कपिला-सुज्योतिका-कनका-भवानी-मणिमुक्ता-आम्रवतीभिः
पुण्यसरिद्भिः आलोकैर्मौक्तिकपङ्क्तिभिरिवावेक्ष्यमाणाभिः पूज्यमाने !
नारीकेल-जम्बीर-रसाल-नारङ्ग-पनस-आमलक-तिन्त्रिणी-मधुक-
कदली-क्रमुकवनसमूहैः, कल्पवीथिकासमानैः,
कूश्माण्ड-पटोलिका- रक्तमूल-उर्वारुक-कारवल्यादि
विचित्र नाना लताभिः कल्पवल्लीभिरिव फलिताभिः,
इक्षुसमूहाक्रान्तोद्यमानसमूहैः, नन्दनवनसमानैः,
सारस- हंस-चक्रवाक-पिक-जलकुक्कुटादि
मञ्जुनिनदपक्षिगणसङ्कुलैः, सर्पगतिभिरिव रोचमानाभिः,

व्यामे व्योमे कुल्याभिः, अनवच्छिन्न विचित्रशलिचतुरस्त्रालि
संरवैः, मेरुमरकतश्यामाभिरिव श्यामायमानैः, पदे पदे
हरिहरमन्दिराश्रयब्रह्मवादिभिः यतिवरैः व्याससमानैः, क्रोशे
क्रोशे अग्रहारवीथिषु स्थितैः ब्राह्मणैः, वेदशास्त्रपारगैः,
वसिष्ठोपमानैः, पुत्रपौत्रादि भाग्यपरिवृतैः
ललानारत्नैः, लक्ष्म्यातुलितैः, श्रीरङ्गपञ्चनदादि
पुण्यक्षेत्रैः, अमरावतीसमानसज्जनसमूहाश्रयत्रिशिरपुरादि
चित्रनगरैः, काश्मीरदेशसमानचोलदेशान्तदेशैः,
अन्यैः विचित्रैश्च प्रदीप्यमान- वरयुग्मतटे
पुलिनोत्पन्नकुश-काश-वेणु-वेत्र-इक्षु विचित्र कृष्ण-
शकुनवंशकुञ्जेषु उषितैः, गजवराहशार्दूल सारङ्गादिभिः
नगोपमानैः, क्षीराब्धिरिव समूलालोड्यमाने सह्यमलक पाक
पयोधिमध्ये भूम्यास्तटलग्नमौक्तिकपङ्क्तिरिव राजमाने,
विष्णुमायेव सकलसुरासुरेरव बुध्यमानपरिमितशक्तिके,
पदमवेक्षणेन श्रियं, वाणीव विद्या, गौरिव साम्राज्यं
च भजन्ती पुनःपुनः दातुमुल्लासवतिके श्रीवल्लभप्रिये,
गन्धर्वादि यक्ष-सिद्ध-साध्य -किन्नर-किम्पुरुषे
विद्याधरोऽप्सरोभिः गीयमानकल्यानगुणगणनिलये, तौलिके मासि
गङ्गादि सर्वतीर्थैः, ब्रह्मविष्णुरुद्रादि देवगणैः, अर्यमादि
पितृगणैः, सनकादिभिस्सिद्धगणैः, भरद्वाजादि ऋषिगणैः,
प्रह्लादसुरगणैः, सर्वजनैश्चावगाहमाने त्रिलोकपावनी कावेरी
भुवि विजयसे! विजयसे! सुदूरं पापानां कलुषनिचया ॥

इति कावेरीस्तोत्रं सम्पूर्णम् ।

Proofread by Prabha Maruvada

*Kaveri Stotram*

pdf was typeset on July 8, 2024

Please send corrections to *sanskrit@cheerful.com*